# सरस्वतीपरिचयः

विद्वान् ड. वेङ्कटरमणभट्टः

इह शिष्टानुशिष्टानां शिष्टानामपि सर्वदा।
वाचामेव प्रसादेन लोकयात्रा प्रवर्तते॥

इति दण्डिनो वचनं वाचो गरिमाणं वर्णयति। अस्मत्सनातनसंस्कृतौ सरस्वती वागीश्वरीत्वेन वागभिन्नत्वेन च उपश्लोक्यते। अतः शब्दमाहात्म्यं नाम स्वरस्वतीमाहात्म्ये पर्यवस्यति। सरस्वत्याः महिमानं न कोऽपि प्रत्याख्यातुमीष्टे पशुभ्यो मनुष्यस्य भेदे वाक्तत्त्वस्य महत्त्वात्। ज्ञानं हि तत्र प्रधानं कारणम्। अतो मानवजीवने ज्ञानपारम्यं दुरपलपम्। ज्ञानाधिदेवता हि सरस्वती यदधीनं ज्ञानप्रकाशनम्। ततः

इदम् अन्धं तमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्येत॥

इति काव्यादर्शकारभणितौ सरस्वतीमहिमा साकल्येन प्रथते। तदिदानीं सरस्वतीविषये किञ्चिद् ग्रथ्नीमः।

## विषयः

सरस्वती नाम विद्यार्थिनां विदुषां च परमश्रद्धेया देवता या वेद-शास्त्रादिपाठोपक्रमे–

प्र णो देवी सरस्वती वाजेभिर्वाजिनीवति।
धीनामवित्र्यवतु।

इत्यादिमन्त्रैः या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता इत्यादिश्लौकैः च अभिष्टूयते विद्यासम्पत्तिमर्थवद्भिः। सा ब्रह्मणा समजनि तेनैव च पत्नीत्वेन पर्यग्राहि इति श्रूयते पुराणकथाविस्तरे। तदुक्तं ब्रह्मवैवर्ते–

आविर्बभूव तत्पश्चात् मुखतः परमात्मनः।
एका देवी शुक्लवर्णा वीणापुस्तकधारिणी॥
कोटिपूर्णेन्दुशोभाढ्या शरत्पङ्कजलोचना।
वह्निशुद्धांशुकाधाना प्रिया पत्नी प्रजापतेः॥
संस्मिता सुदती वामा सुन्दरीणां च सुन्दरी।
श्रेष्ठा श्रुतीनां शास्त्राणां विदुषां जननी परा॥
वागधिष्ठातृदेवी सा कवीनामिष्टदेवता।
शुद्धसत्त्वस्वरूपा च शान्तरूपा सरस्वती॥ [ब्रह्मखण्डे ५२, ५३, ५४,५५] इति।

सेयं ब्रह्मभार्येति प्रसिद्धावपि, नारायणस्य पत्नी, लक्ष्मीसपत्नी इति श्रूयते ब्रह्मवैवर्तपुराणे प्रकृतिखण्डे। क्वचिद् ब्रह्मणो मुखाज् जातेति। क्वचिच्च ब्रह्मणो यज्ञकुण्डाज्जातेति उपलभ्यते। ब्रह्मणा आराध्यमानाद् भरतनामकाद् यज्ञाग्नेः जाता इत्यतः भारती इत्यपि आख्या तस्याः प्रसिध्यति। ब्रह्मणो जाता इत्यतो ब्राह्मीति प्रथमानायाः तस्याः कालान्तरे नदीरूपमापन्नायाः सरस्वती इति अभिधानं जागर्ति सरो नीरमिति कथनात् तद्वती इत्यर्थानुसन्धानात्। अस्याः पुत्रः काव्यपुरुष इति काव्यमीमांसायां राजशेखरः अवदत्। तान्त्रिकास्तु आदिशक्तेः महामायायाः किञ्चन रूपं ब्रह्मपत्नीलक्षणं सरस्वतीत्याहुः। यदन्ववदन् शङ्करभगवत्पादाः–

गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदः इति।

## सरस्वत्याः भौतिकं रूपम्

सरस्वत्याः भौतिकं रूपं तु या कुन्देदुतुषारहारधवला इत्यादिभिः नैकैः श्लोकैः प्रसिद्धमेव विद्यते। शुभ्रवर्णा, वीणां पुस्तकं स्फाटिकमालां च बिभ्रती, हंसवाहना च विराजते भारती। अत्र सरस्वत्याः शुभ्रवर्णः तस्याः सात्त्विकतां निरूपयति। वीणापाणित्वं तस्याः सङ्गीतकाव्यादिकलाधिपत्यं व्यञ्जयति। पुस्तकं च वेदशास्त्रादिज्ञानसम्राज्ञीत्वं, वेदवाङ्मयस्य सृष्टिकर्मसर्वस्वत्वं, वाचः व्यवहारपरमसाधानत्वं च सङ्केतयति। एतदुपोद्बलकमाह भगवान् व्यासो भागवते–

प्रचोदिता येन पुरा सरस्वती वितन्वता–
जस्य सतीं स्मृतिं हृदि। इति।

नारायणनाभिनलिनादुदितो ब्रह्मा नष्टचेष्टः तस्थौ तदा नारायणः तस्य हृदये सृष्टिकर्मबोधं चिकीर्षन् सरस्वतीं वेदलक्षणां प्रचोदयामास इत्ययं प्राकरणिकवृत्तान्तः।

## सरस्वत्याः शब्दरूपत्वम्

इदं हि परिपश्यामो यद् वाग् वाणीप्रभृतयो वचनवाचिनः शब्दाः दृश्यन्ते सरस्वतीवाचित्वेनापि। ततः प्रतीयते यद् वाक्-

सरस्वत्योः अभेदो वर्तते इति।

ननु शब्दः आकाशगुणः इति पठन्ति आगमविदः, तत्कथं शब्दो रूपं सरस्वत्याः भवेदिति स्यादाशङ्का कस्यचित्।

तत्रेदानीं प्रसादयामः–

चत्वारि वाक् परिमिता पदानि
तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेङ्गयन्ति
तुरीयं वाचो मनुष्या वदन्ति॥

इत्ययं वाग्भेदवादी मन्त्रो भवति वाग्देवीसूक्ते। निगमागमज्ञा वदन्ति यत् परा पश्यन्ती मध्यमा वैखरी चेति चत्वारो वाक्प्रकाराः। तत्र आदिमं प्रकारत्रयं गुहायां भवति, मनोहृदयाद्यन्तर्विषयकमिति यावत्। तुरीयो वैखरीलक्षणो वाक्प्रकारः कण्ठताल्वादिभिरभिव्यङ्ग्या मानवभाषा इति। एवञ्च सर्वविधा वाक् सरस्वत्या एव रूपमिति विज्ञायते। तथैव, वागभिमानिनी देवता सरस्वतीति प्रसिद्धिः या खलु अशेषं वाङ्मयम् अहम् इति मन्यते शब्दात्मकशरीरे आभिमानिकतादात्म्यात् पार्थिवशरीरे अस्मदादिवत्।

अखण्डं चैतन्यं परा वाग् इति संज्ञितम्। विषयोपधातः अखण्डं चैतन्यं वैषयिकज्ञानात्मना अवभासते यस्य अर्थः इति व्यपदेशः। सोऽर्थः शब्दाभिव्यङ्ग्यः। अथवा अखण्डज्ञानात्मकं चैतन्यं मनोबुद्ध्याद्युपाधिवशाद् विवक्षाविषयीभूतार्थत्वेन सत् शब्दाकारेण मुखाद् निस्सरति। गामानय इत्यत्र गौः इति पदार्थो गृह्यते। गां पठ इत्यत्र च गोशब्दं पठ इत्यनुसन्धानात् शब्दो गृह्यते। अर्थाद् अर्थतः शब्दग्रहणं शब्दतः अर्थग्रहणमिति तयोरभेदो निरणायि आगमज्ञैः। एतेन विद्यास्वरूपिण्याः सरस्वत्याः शब्दस्वरूपमपि स्वरससिद्धमिति स्पष्टम्।

## उपसंहारः

विद्याधिदेवी वागधिष्ठात्री सरस्वती सर्वेषां ज्ञानलिप्सूनां परमोपास्या भवति। ध्यानयोगी अपि ॐकाररूपवागनुसन्धिनी लभतेतरामात्मज्ञानं चेत् वाचः उपास्यत्वमाहात्म्यस्य विस्तरेणालम्। सरस्वतीपूजावसरे तु बालानामक्षराभ्यासारम्भः प्रसिद्ध एव भारते। शरन्नवरात्रावसरे सरस्वती पूजा प्रवर्तते दक्षिणदेशेषु। अतो विजयादशमी विद्यादशमीत्यपि आख्यायते। शास्त्रज्ञानकवित्वादिलाभाय सरस्वत्युपासना आगमेषु पठ्यते। क्षेमेन्द्रः कवित्वादिलाभाय सरस्वत्युपासनाक्रमं कविकण्ठाभरणे निरूपयामास। जप-ध्यान-वेदशास्त्राभ्यासयोग्यो ब्राह्ममुहूर्तः सारस्वतमुहूर्तः इति व्यपदिष्टः आलङ्कारिकैः। एवं सरस्वत्या महिमा पारे वाचाम्। अन्ते मल्लिनाथनिबद्धं सञ्जीवनीटीकामङ्गलमुच्चार्य विरम्यते–

शरणं करवाणि शर्मदं ते
चरणं वाणि चराचरोपजीव्यम्।
करुणामसृणैः कटाक्षपातैः
कुरु मामम्ब कृतार्थसार्थवाहम्॥




अस्मद्विश्वविद्यालये देव्या नीराजनम्